# Rishi Agastyaproktam Shivapujasadhanani 1 Snanakarmashivamantropadesham

# ऋषि अगस्त्यप्रोक्तं शिवपूजासाधनानि १ स्नानकर्मशिवमन्त्रोपदेशम्

## Document Information

Text title : Rishi Agastyaproktam Shivapujasadhanani 1 Snanakarmashivamantropadesham

File name : shivapUjAsAdhanAni1snAnakarmashivamantropadesham.itx

Category : shiva, shivarahasya, mantra, pUjA, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 140-153.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# Rishi Agastyaproktam Shivapujasadhanani 1
# Snanakarmashivamantropadesham

# ऋषि अगस्त्यप्रोक्तं शिवपूजासाधनानि १
# स्नानकर्मशिवमन्त्रोपदेशाम्

(शिवरहस्यान्तर्गते उग्राख्ये)
मन्त्रेरेतैः स्नानकर्म शिवाय विनिवेदयेत् ।
चैत्रस्नानेन भगवान् महारुद्रो विराड्गतिः ॥ १४० ॥

प्रीणातु पार्वतीनाथश्चित्रसृष्टिविशारदः ।
वैशाखमासस्नानेन भगवान्गिरिजापतिः ॥ १४१ ॥

प्रीणातु श्रीमहादेवो विष्णुब्रह्मादिवन्दितः ।
ज्येष्ठस्नानेन भगवान्देवश्रेष्ठो महेश्वरः ॥ १४२ ॥

प्रीणातु शङ्करीयुक्तो नानागणनिषेवितः ।
अषाढमासस्नानेन भगवान्गिरिजापतिः ॥ १४३ ॥

प्रीणातु सर्वभूतात्मा सद्यो दाक्षायणीयुतः ।
नभःस्नानेन भगवान्भगनेत्रभिदीश्वरः ॥ १४४ ॥

प्रीणात्वार्यायुतो देवो देववर्यः सनातनः ।
नभस्यमासस्नानेन भगवान्विश्वलोचनः ॥ १४५ ॥

प्रीणातुः सोमः सोमात्मा विभुर्हैमवतीयुतः ।
आश्वीजमासस्नानेन भगवान्विश्वहृद्गतः ॥ १४६ ॥

प्रीणातु त्रिपुरारातिरीशानीप्राणनायकः ।
भगवान् कार्तिकस्नानात् सोमसूर्याग्निलोचनः ॥ १४७ ॥

प्रीणातु दुर्गासंयुक्तो दुर्गपातकनाशनः ।
मार्गशीर्षस्य मासीय (मासस्य) स्नानेन भगवान्भवः ॥ १४८ ॥

प्रीणातु सच्चिदानन्दो भवानीप्राणनायकः ।

पुष्यस्नानेन भगवान्पुष्टिदः पुरुषोत्तमः ॥ १४९॥

प्रीणातु मन्मथारातिरम्बिकाप्राणवल्लभः ।
माघस्नानेन भगवानुमाकान्तो जगत्पिता ॥ १५०॥

प्रीणातु शिवया युक्तः सर्वमङ्गलसंश्रयः ।
भगवान्फाल्गुनस्नानान्नीलकण्ठो जगत्पतिः ॥ १५१॥

प्रीणातु मङ्गलायुक्तः सर्वमङ्गलदायकः ।
मन्नामैवं समुच्चार्य प्रतिमासं प्रयत्नतः ॥ १५२॥

स्नानं यः कुरुते नित्यं स स्नानफलभाग्भवेत् । १५३.१

॥ इति शिवरहस्यान्तर्गते ऋषि अगस्त्यप्रोक्तं शिवपूजासाधनानि १ - स्नानकर्मशिवमन्त्रोपदेशं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २६ कुम्भघोणमहिमानुवर्णनम् । १४०-१५३.१ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 140-153.1..

Notes:

Ṛṣi Agastya ऋषि अगस्त्य delivers Upadeśa उपदेश (to Dvija द्विज) about Śiva Nāma Mantra-s शिवनाममन्त्र pertaining to Snānakarma स्नानकर्म for each month - starting from Caitra चैत्र.
The Adhyāyaḥ 26 अध्यायः २६ has several other details about Śivapūjāsādhanāni शिवपूजासाधनानि.

Proofread by Ruma Dewan

---

*Rishi Agastyaproktam Shivapujasadhanani 1 Snanakarmashivamantropadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*